स्तम्भयति प्रवृद्धो मूले च जिह्वा भृशमेति पाकम्। प्रगाढः प्रकर्षेण गाढो दारुणः। कफरक्तमूर्त्तिः कफरक्ताभ्यां मूर्त्तिर्यस्य स कफरक्तज इत्यर्थः। जिह्वास्तम्भेन वायुरत्र बोद्धव्यः। भृशं पाकेनेति पित्तञ्च अतस्त्रिदोषजोऽयम्। असाध्यत्वञ्चास्य। उपजिह्विकामाह। जिह्वाग्ररूपः श्वयथुश्च जिह्वामुन्नाम्य जातः कफरक्तयोनिः। प्रसेककण्डूपरिदाहयुक्तः प्रकथ्यतेऽसावुपजिह्विकेति। जिह्वाग्ररूपः जिह्वाग्राकृतिः” भावप्र०। “पक्वान्नहरणाच्चैव जिह्वारोगः प्रजायते” शातात०।

**जिह्वाशल्य** पु० जिह्वायाः शल्यमिवास्त्यस्य अच्। खदिरवृक्षे राजनि०।

**जिह्वावत्** पु० यजुर्वेदीयवंशान्तगतर्षिभेदे। “अथ वंश” इत्युपक्रमे। “जिह्वावतो बाध्योगाज्जिह्वावाँ बाध्योगः” शत०ब्रा०१४।९।४।३३। २जिह्वायुक्ते त्रि०। स्त्रियां ङीप्।

**जिह्वास्वाद** पु० जिह्वया स्वादः। लेहने (चाटा) हेमच०।

**जीति** स्त्री जि–क्तिन् वेदे दीर्घः। जये “अजीतयेऽहतये पवस्व स्वस्तये” ऋ० ९।९६।४। “अजीतये अजयाय” भा०। लोके तु ज्या–क्तिन् सम्प्रसारणे “अचः” इति पा० सम्प्रसारणस्य दीर्घः। २हानौ स्त्री।

**जीन** त्रि० ज्या–क्त सम्प्रसा० दीर्घः। जीर्णे अमरः “जीनकार्मुकवस्त्रादीन् पृथक् दद्यात् विशुद्धये” मनुः।

**जीमूत** पु० जयति नभः, जीयतेऽनिलेन वा। जि–क्त। “जेर्मुट् चोदात्तः दीर्घश्च”। जीवनस्योदकस्य मूतं बन्धो यस्मेति वा जीवनं जलं मूतं बद्धमनेन। मूङ् बन्धने कर्म्मणि क्तः पृषोदरादित्वात् साधु। ज्यानं जीर्णं ज्या–सं० क्विप्, जिया वयोहान्या मूतो बद्ध इति वा जीवनं मुञ्चति वा पृषो०। १पर्वते २मेघे ३मुस्तायां ४देवताडवृक्षे च अमरः ५इन्द्रे ६भृतिकरे ७घोषकलतायां च हेम०। मेघे “यथा जीमूतशब्देन स्त्रीणां त्रासोऽभिजायते” दुन्दुभिपूजामन्त्रः। “जीमूतैरपिहितसानुरिन्द्रकीलः” किरा०। “जीमूतस्येव भवति प्रतीकम्” ऋ० ६।७५।१ “प्रतिचरणविवृद्धरेफाः स्युरर्णार्णवव्यालजीमूतलीलाकरोद्दामशङ्खादयः” वृ० र० उक्ते दण्डकभेदे तथा च एकादशभीरगणैः रचितो जीमूताख्यो दण्डकः। स्वार्थे क। जीमूतक तेष्वर्थेषु।

**जीमूतकूट** पु० जीमूतो मेघः कूटेऽस्य। पर्वते हारा०।

**जीमूतकेतु** पु० विद्याधरपतौ राजभेदे जीमूतवाहनपितरि। नागानन्दे दृश्यम्।

**जीमूतमूल** पु० जीमूतस्य मुस्तकस्य मूलमिव मूलमस्य। शठ्यां शब्दरत्ना०।

**जीमूतवाहन** पु० जीमूतो मेघो वाहनमस्य। मेघवाहने १इन्द्रे शालिवाहनपुत्रे २नृपभेदे जिताष्टमीशब्दे दृश्यम्। जीमूतकेतोः विद्याधरस्य ३पुत्रे च तत्कथा नागानन्दे दृश्या।

**जीमूतवाहिन्** पु० जीमूतं मेघमुद्दिश्य वहति ऊर्द्ध्वं गच्छति वह–णिनि। धूमे हेमच०। मेघानां धूमादेवाविर्भावात् तस्य तथात्वम्।

**जीर** पु० ज्या–रक् संप्र०दीर्घः। १जीरके, २खड्गे, ३अणौ च। मेदि० “जोरी रक् च” उणा० सौ० जु–रप्रत्ययः ईत्त्वान्तादेशः। ४जवशीले ५क्षिप्रे च उज्ज्वल० जीरदानुः। “उत नः सुद्योत्मा जीराश्वः” ऋ०१।१४१।१२। “जीराश्वः क्षिप्राश्वः” भा०। संज्ञायां कन्। (जीर) ख्याते पदार्थे मेदिनि०। मदनपालनिघण्टौ तस्य त्रैविध्यं तद्भेदा गुणाश्चोक्ता यथा “जीरकं दीर्घकं शुक्लमजाजीकणजीरकम्। जीरकं जरणं कृष्णं वर्षकाली सुगन्धिकम्। कालिका वाष्पिका कुञ्चिकारवी चोपकुञ्चिका। पृथ्वीका सुखवी पृथ्वी स्थूलजाप्युपकालिका। जीरकत्रितयं रूक्षं कटूष्णं दीपनं लघु। संग्राहि पित्तलं मेध्यं गर्भाशयविशुद्धिकृत्। चक्षुष्यं पवनाध्मानगुल्मच्छर्दिबलासजित्” मदनपालः।

**जीरण** पु० जीरक+पृषो०। जीरके राजनि०।

**जीरदानु** पु० जीरं क्षिप्रं जवशीलं वा ददाति दा–नु। १जवशीलदाने, २क्षिप्रदातरि च “विद्यामेषं वृजनं जीरदानुम्” ऋ० १।१६६।१५ “जीरदानुं जयशीलदानम्” भा० “जीरदानुरेतो दध्यत्योषधीषु गर्भम्” ५।८३।१ “जीरदानुः क्षिप्रदानः” भा०।

**जीरि** पु० जीर्य्यति जॄ–बा० रिक्। १मनुष्ये “रक्षन्ति जीरयो वनानि” ऋ०४।५।१६ “जीर्य्यन्ति इति जीरयो मनुष्याः” भा० जॄ–अन्तर्भूतण्यर्थे रिक्। २जारके ३अभिभावके च त्रि० “प्रजीरयः सिसते सध्र्यक् पृथक्” ऋ० २।१७।३ “जीरयो जरयितारः” भा०।

**जीर्ण** त्रि० जॄ–क्त। १जरायुक्ते २पुरातने च अमरः “वासांसि जीर्णानि यथा विहाय” गीता। “जीर्णमन्नं प्रशंसीयात् शस्त्रञ्च गृहमागतम्” चाणक्यः। २शैलजे न० राजनि०। ३उदराग्निना कृतपाके त्रि०। “अजीर्णे भेषजं वारि जीर्णे वारि बलप्रदम्” वैद्यकम्।